GOPAL CHUNDER LAW MEMORIAL TEXT SERIES

Vol. 3

THE

# RĀMACANDRA-YAŚAḤ-PRABANDHA

OF

# GOVINDA-BHAṬṬA

*ALIAS*

# AKBARĪYA-KĀLIDĀSA

CHAUDHURI

**PRACYAVANI GOPAL CHUNDER LAW**
**MEMORIAL TEXT SERIES**

**Vol. 3**

# THE
# RĀMACANDRA-YAŚAḤ-PRABANDHA
OF
# GOVINDA-BHAṬṬA

*ALIAS*

# AKBARĪYA-KĀLIDĀSA

*edited for the first time with an Introduction in English, Indices, etc.*

BY

**Prof. Dr. JATINDRA BIMAL CHAUDHURI**

*of Presidency College, Calcutta and Calcutta University ;*

*Jt. Secretary,* PRACYAVANI

CALCUTTA

**1946**

Published by

Dr. J. B. Chaudhuri

PRACYAVANI

3, Federation Street, P. O. Amherst Street, Calcutta

*Available at:—*

MEHER CHAND LACHHMAN DAS

Jain Street, Said Mitha Bazar, Lahore

ORIENTAL BOOK AGENCY

15, Shukrawar Peth, Poona

CHUCKERVERTY, CHATTERJEE & CO.

15, Bankim Chatterjee St., Calcutta

DAS GUPTA & CO.

54/3, College Street, Calcutta

and from the

PRACYAVANI

3, Federation Street, Po. Amherst Street,

Calcutta.

DEDICATED TO

DR. BIMALA CHURN LAW, M.A., B.L., Ph.D.
D.LIT., F.R A.S.B., F.B.B.R.A.S., etc.

*President*:
PRACYAVANI

# INTRODUCTION.

## *1. History of this Edition.*

When my critical editions of Sanskrit anthologies were passing through the press, I could not avail myself of the MS. of the Rāmacandra-yaśaḥ-prabandha belonging to the Royal Asiatic Society of Bengal. Owing to the exigencies of the World War II, it was kept in safe custody at the Benares Hindu University Library. Nor could I get for my use the MS. of this work preserved at Bikaner State Library. It must be recorded here with deep regret that I have not as yet been able to get a copy even of this MS. which would have, undoubtedly, saved much labour and time. Under the circumstances I have been compelled to prepare this edition from a single MS. viz. the one of our Royal Asiatic Society of Bengal. It is further to be regretted that owing to abnormal printing-difficulties, the publication of this work has been much delayed. As was expected,[1] some of the verses quoted under the name of Akbarīya-Kālidāsa in Koṣa-Kāvyas have been traced to this work.

## *2. The Author of the Rāmacandra-yaśaḥ-prabandha.*

Regarding the life and literary activities of Akbarīya-Kālidāsa *alias* Govinda Bhaṭṭa who is undoubtedly the greatest Sanskrit poet of the Court of Akbar and one of the greatest Sanskrit poets of Muslim India, I would like to draw the attention of my readers to pp. XVII, XVIII, XXXVI and XLIII—L VI of my edition of the Padyāmṛta-taraṅgiṇī, pp. 9-10 of my edition of the Sūkti-Sundara, pp. 12-13 of my edition of the Padyaveṇī, and pp. 33-45 of my Muslim Patronage to Sanskritic Learning and pp. 45-58 of the Indian Culture, Vol. XIII, No. 1, July-September, 1946. From what we have been able to discover about this poetic genius of India, it may reasonably be said that the poet is quite justified in his assertion as follows :—

अनाराध्य कालीमनास्वाद्य गौडीमृते मन्त्रतन्त्राद्विना शब्दचौर्यात् ।
प्रबन्धं प्रगल्भं प्रकर्तुं प्रवक्तुं विरिञ्चिप्रपञ्चे मदन्यः कविः कः ॥

(V. 786 of the Padyaveṇī)

---

1. See p. XIII of my Introduction to the Padyāmṛta-taraṅgiṇī.

## 3. *Date of the Work.*

The present work was composed in praise of King Rāmacandra, son of Vīrabhānu, the illustrious ruler of Bandogaḍha and Gahorā. Rāmacandra ruled from 1555-1592 A.D. There is no doubt that the work was composed during this period. Now, it records the defeat of Ibrahim Shah three times[1]. Mādhava records in v. 13 of the tenth canto of his Vīrabhānūdaya-kāvya[2] that Sultan Muhammad Saidal sought for his protection :—

रामस्य धैर्यं किमु वर्णयामो येनार्थिसार्थप्रतिमीकृतोऽयम् ।
सईदिलिस्त' शरणागतोऽभूत् स्वयं सुरत्राणमहम्मदादिः ॥

Badāoni says that Sultan Muhammad Sur Adali fled for fear of Ibrahim Sur from Gwalior to Bhata which is identical with Gahorā. From the statement of the present work, it is to be presumed that for the safety of Adali, the benign ruler of Gahorā uprooted Ibrahim altogether; the statement on p. 2 (after dots) would show as though Ibrahim was compelled to part with his family-members as well. This incident took place about 1555 A.D. So this does not help any further the fixing up of the date of composition of the work than this that the work was composed in or after 1555 A.D.—a fact that is obvious enough.

Now, the work also records that Rāmacandra extended his sway over Mahārāṣṭra (v. 17, p. 7), receiving taxes from its ruler and over Karahāṭ (v. 17, p. 7), Aṅga, Vaṅga and Kaliṅga (I. 25, p. 1) as well. Rāmacandra was a mighty ruler and this is well-established from the writings of his contemporary writers in Sanskrit and Semitic languages. Rāmacandra as described in the present work is represented in the zenith of his power and we are naturally led to think that the book was composed not earlier than 1580 A.D. or so.

## 4, *Rāmacandra and his Family.*

Rāmacandra's family is known as the Baghela Family. It is the contracted form of village Vyāghrapallī, named after Vyāghradeva, the first Baghela King of Rewa.

---

1. See p. 2, l. 16...हिमनृप evidently stands for इब्राहिमनृप ; p. 2, l. 27 साहिबाराहिम, etc.; p. 6, l. 31, विलुरिठतेबराहिम, etc.

2. Ed. by Mr. K. K. Lele and Pt. Ananta Shastri Upadhya, Rewa, 1938 (?)

There is some indiscrepancy in genealogical accounts recorded in Rewa State Gazetteer, the Bhakta-mālā of Mahāraj Raghurāj Singh Ju Deva, the Vīrabhānūdaya-kāvya of Mādhava, Ms. of Somadeva's Kathā-sarit-sāgara copied by Rūpaṇī (vide M.M. Haraprasad Shastri's Catalogue of Sanskrit Mss., Vol VII) and Pradyotana Bhaṭṭācārya's commentary Sāradāgama on Candrāloka as well as Vīrabhadra-campū, etc. The genealogy of the family as given by Vīrabhadra, the last ruler of Baghelakhaṇḍa, in his Kandarpa-cūḍāmaṇi is identical with that mentioned in the Vīrabhānūdya-kāvya from Śālivāhana to Vīrabhadra. The family-tree from Śālivāhana to Vīrabhadra, the last ruler of the family, is as follows:—

Śālivāhana
|
Vīrasiṃha
|
Vīrabhānu
|
Rāmacandra
|
Vīrabhadra

Sanskrit Literature of mediaeval India is full of praise for these rulers of Baghelakhaṇḍa, particularly, Vīrasiṃha, Vīrabhānu and Rāmacandra. One of the greatest admirers of Vīrabhānu was Bhānukara or Bhānudatta, author of the Rasamañjarī, Gīta-Gaurīśa, etc.[1] The anthologies alone contain more than 50 verses in praise of Rāmacandra and probably, no ruler of mediaeval India has been so highly praised by our Sanskrit poets as this scion of the Baghela dynasty[2]. His son Vīrabhadra was fortunate in having Padmanābha Miśra or Pradyotana Bhaṭṭa in his Court who wrote a work on his exploits, etc. under the title Vīrabhadra-campū.[3] The hereditary friendship between the Moghul rulers and those of Baghela-khaṇḍa made Hindu-Muslim unity a unique factor in national life. Babar was a friend of Vīrasiṃha, Humāyūn of Vīrabhānu and Akbar of Rāmacandra, We quote the following verses from the 12th Canto of the

---

1. For a detailed account of the life and literary activities of this poet, see my Padyāmṛta-taraṅgiṇī, pp. lvii—I xxxviii. For references to Vīrabhānu in the verses of Bhānukara, see particularly, pp. lxiv—lxvi. For Pradyotana Bhaṭṭa's praise of Vīrabhānu, see his Commentary Sāradāgama on Candrāloka (Kasi Sans. Series, No. 75).

2. For Akbarīya-Kālidāsa's praise of Rāmacandra and some of his verses on this subject, see Padyāmṛta-taraṅgiṇī, pp. xliv—xlv.

3. See Peterson's Reports, voe. I, p. 140

Vīrabhānūdaya-kāvya which must serve as an eye-opener to all those who hold up communal strife as a bar to our national development. The verses reveal that Humāyūn called Vīrabhānu his brother and considered his family as his own, the latter's son Rāmacandra his son and grandson of Vīrabhadra as his own grandson. On the festive occasion of the birth of Vīrabhadra, the Moghul ruler of Delhi sent all sorts of royal presents to the Hindu ruler of Baghelakhaṇḍa :—

आकर्ण्य दिल्लीश्वरभूपमौलिः श्रीमान् हुमायूं यवनाधिनाथः ।
श्रीवीरभानोस्तनयस्य जातं सुतं प्रमोदं बहुधा प्रपेदे ॥२०॥
स प्रेषयामास निजैरमात्यवरैः शुभान्याभरणानि हृष्टः ।
अश्वांश्च वासांसि सुगन्धवस्तु आलीकृतस्तेन हि वीरभानुः ॥२१॥
श्रीवीरसिंहस्य यथा बभूव सुभ्रातृभावः सह बाबरेण ।
क्षौणीश्वरेणेह तथैव तेन श्रीवीरभानोरपि बन्धुभावः ॥२२॥
पौत्रं तवेमं नृप वीरभानो जातं किलाहं निजमेव मन्ये ।
को भ्रातृपौत्रेऽथ निजे विशेष इत्याह लेखे स च मुद्गलेशः ॥२३॥

Again it is expressly stated in Canto X of the Vīrabhānūdaya-kāvya that Rāmacandra used to spend lavishly upon Tānasena, the greatest Musician of India[1],—

गान्धर्वविद्यामयदेहभाजे यस्तानसेनाय कलाविदेऽदात् ।
रागं प्रतीह प्रतितानमेतत्प्रतिध्रुपत् कोटिशशाङ्कटङ्काः ॥२६॥

and such Tānasena, the greatest favourite of the ruler, was no doubt, sent over by the ruler himself to his family-friend Akbar with great joy. What better record of Hindu-Muslim brotherhood would Sanskrit Literature furnish than this ?

Rāmacandra's mother was Rāyamatī or Rājamatī and the prince got his training from minister Gaṇeśa Rāut. He married Yaśodā, grand-daughter oJ Kīrtisiṃha and daughter of Mādhavasiṃha of Gaura. The happy couple was blest with a son, viz. Vīrabhadra, who died in 1593 A.D., one year after the death of his father, of

1. दुर्लङ्घ्यशैलोपरि सिन्धुमध्ये द्वीपान्तरालेऽपि विले वने च ।
श्रीरामचारित्रसुधाभिषिक्ता यस्य ध्रुपज्जीवति सर्वकालम् ॥
तत्रैव तत्रैव वचो विलासा यत्रैव यत्रैव जनाश्चरन्ति ।
यत्रैव यत्रैव वचांसि नूनं सा तानसेनोक्तिरुदेति तत्र ॥

Vīrabhānūdaya kāvya, Canto x, vv. 30-31

the injuries sustained by him on account of his fall from the palanquin on his way back home from Delhi on hearing the news of the death of his father.

The adjectives बलभद्रसहोदरभक्तिनिधि' (v. 19, p. 7), विधिवज्जपतोषित-चक्रधरं (v. 21, p. 8), सनकादिसमानमुकुन्दरति' (v. 27, p. 8) etc. prove beyond doubt that Rāmacandra was a worshipper of Viṣṇu. This is amply borne out by many verses composed in praise of this illustrious ruler of Rewa.

### 5, *The importance of the Rāmacandra-yaśaḥ-prabandha.*

Apart from the historical importance of this work, it will stand the test of time for its splendid style and beautiful alliterative language. A close study of the work reveals that it is neither a prose nor a poetical treatise nor is it a mixture of both prose and poetry like the Campū-kāvya. Its prose is all poetry ; still it is not poetry as some difficulties regarding punctuations and some minor-details at times crop up and the whole composition cannot, therefore, be strictly called metrical. Still, one constantly feels like calling it a metrical work. This peculiar form of Sanskrit composition, mostly in vocatives, musical though full of long compounds, appears to have evolved during Muslim rule in India. Another similar type of composition is the letter of Dara Shukoh addressed to one Nṛsiṃha Gosvāmin[1]. The Jagadvijaya-chandas of Kavīndrācārya, edited by Dr. C. Kunhan Raja as Vol. 2 of the Ganga Oriental Series, also represents a similar type of composition though the Akbarīya-yaśaḥ-prabandha originating from the pen of the greatest Sanskrit poet of the court of Akbar has naturally a unique grace and beauty of its own. This style of composition may naturally be deemed as a gift of Vedic-Islamic Culture to India. Still, another novel form of Sanskritic composition of this age—a peculiar combination of Sanskrit and Semitic languages, particularly Persian—will be witnessed in the Ābdullāh-carita of Lakṣmīdhara, a critical edition of which will soon be published for the first time in the next issue of the Prācyavāṇī (Vol. III, Part IV, October, 1946).

Several verses of the Rāmacandra-yaśaḥ-prabandha have been quoted by the compilers of Sanskrit anthologies from the beginning of the seventeenth century A.D. down to to-day (see p. 11). This is a definite proof of the extensive popularity of the work ever since its composition,

1. See Adyar Library Bulletin, Vol. IV, p. 3, pp. 87-94.

### अकबरीकालिदास-गोविन्दभट्ट-विरचितः

# रामचन्द्र-यशः-प्रबन्धः

### डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन संस्कृतः

हेम-ग्राम-प्रमत्तद्विरद-हय-घटा-कङ्कणश्रेणि-मुक्ता-
माला-दोलादिकण्ठाभरण-पदमहत्त्वादिनोच्चप्रतिष्ठः ।
न्यक्कुर्वन्तं चरित्रैर्नलभरतहरिश्चन्द्रकौन्तेयकीर्ती-
र्वीरश्रीरामचन्द्रक्षितितिलकमिह स्तौति गोविन्दभट्टः ॥१॥

स्मेरे चन्द्रावतंसे हसति सकुतुकं षण्मुखे सोपहासं
पश्यत्यालीकदम्बे गणसदसि शिशु-क्रीडितं प्रेक्षमाणे ।
मा मेति व्याहरन्त्यास्तुहिन-गिरि-भुवः कम्पमानाग्रपाणेः
कर्षन्ती कर्णकेली-किसलयमवताद्बालहेरम्ब-शुण्डा ॥२॥

जय जय राम क्षितिधर राम प्रतिकृति-राम प्रतिनिधि-राम प्रतिभट-सामध्वनिरसकाम स्फुरदभिराम प्रतिनवधाम-प्रमुदितधाम-प्रविदितधाम द्रुतकविकामप्रद-संग्राम-द्युमणिजवाम प्रतिघट-धाम-ज्वलनमहाम-क्षितिपललाम दसाम(?)प्रभवनिकाम-प्रबल-श्याम-स्फुरदलिदाम द्युतिकच-नाम-श्रवणविराम-श्रितरिपुसाम स्तिमित-मतल्ली-विकसितमल्ली-कचगुण-वल्ली-तरुवृत-भिल्ली-पति-पुरल्ली-सकवलचिल्ली-सुललितभिल्ली-परिवृतपल्ली-कृतरतिभिल्ली-भवदरिपल्लीन भुवन-सल्लीलतिलकजम्भा-हित-करिकुम्भामलकुचकुम्भाऽतिललितरम्भापटुरतसम्भावनशत-सम्भावित सुखसम्भारकरिपुरम्भा-विरहितदम्भाहितपरपुम्भावजलधिसम्भावनभवशुम्भाकलित-निशुम्भारि( पु )समशुम्भाकृतिभुज-शम्भावनिरतडिम्भाकृतधररम्भातुहिनचिरम्भासुरभविकम्भावय विविधम्भारतसमकर्णप्रतिमसुवर्ण-प्रभ-तनुवर्ण द्रुतकविकर्णज्वरहरवर्ण प्रणतसुपर्णध्वज-परमर्णस्पतिनिभकर्णायतशतपर्णामलबहुकर्णा-करहगपर्णाहतनतवर्णाधिप नतकर्णाटक हरिचन्दन-मृग मदचन्दन-सुललितवन्दन पृथुतरनन्दन-भुजकविनन्दन-तरुवर-चन्दनजगदभिवन्दन सुकृतस्यन्दन सुचरित-नन्दन रणभुवि कृत्त-प्रतिभटमत्त-द्विपकुल चित्त-प्रभुनिभ-चित्त-प्रभव-प्रवृत्त-प्रभजित-मत्त-द्विरदविपत्तस्करवर तत्तद्धिमिकिटिरत्तद्धनि-भृतनृत्तक्रमबुधवृत्त प्रवरसुवृत्त-व्यतिकरगङ्गाविमलतरङ्गामृतकरगङ्गाधरनिभतुङ्गामलगुणभङ्गालयपर-श्रृङ्गारनिलय वङ्गाविपबृहदङ्गावनिपकलिङ्गाधिपते लङ्काधिप-नतश्रृङ्गाटकनुतश्रृङ्गाकलितभुजङ्गावनिप विहङ्गाधिपतिकुरङ्गाहितक-पतङ्गागणिततुरङ्गाधि-पतिमतङ्गाधिपरणरङ्गानुपमनिषङ्गार्जुन लसदङ्गा-सितमणिभङ्गावलिपटु-भृङ्गाकररुचि-भङ्गार्पणकचभङ्गा-ह्वितविपदङ्गारक-रसभृङ्गारक करसङ्गाभिहत-मृदङ्गारवपरमङ्गाट[घु] ? स्तुणपिङ्गाकलितलवङ्गादिसुरभि-रङ्गाऽमलतरकीर्ते रतिपतिमूर्ते कृतकविपूर्ते रिपुकुलजूर्ते सुकृतस्फूर्ते दलितनतार्ते रणशमनार्ते हृदि विधुवर्ते निरुपमशीलामृतरसकीलालभवन-

लीलामुकुलितकीलालजवनलीलायितदृगरालालघुतरहालाहलधरभालाजिरपटुकालानलजम्बालाविषम-ज्वाला-पटलजटालातुरकरवालादलितकरालाहितकुलबाला-कचभरमाला-मिलदलिजालाकुलपदतालानुगतविशालारभटिजटालाभिनटनशालायितरिपुगालातिरुधिरहालाभृतवेतालाकलितभुजालापकविर-मालाशय धनपालाधिककमलालालितभुजनालावलयितबालापलितव्यालाधिपवलहेलाजलनिधिवेला-विदित महेलासदन वघेलाधिप दलदेलापरिमलवेलावृत सुमते लाटनतमहेलाधिपपते(?)धवरुरणेला-वृतविदितेलाहृतरिपुशूलानमदनुकूलावनिपतितूलामणिशुभमूलामृतनिधिकूलाविदितदुकूलार्चित कवि-तूलाधिक लघुमूलाकुलरिपुमूलानलभयलोलावनितलकोलाधिपगुणकोलाहल-भृतचोलाधिपभयदोला-यितपरचोलार्चितभूगोलानुपमकपोलाजिरगजगण्ड-व्रजमदखण्ड-प्रतिमितखण्डक्षितितलचण्डस्फुटभुज-दण्डप्रतिहतचण्ड--प्रतिभटमुण्डस्फुटविधुतुण्ड-प्रललितगण्डस्फुटजवधाटी-विधृतवधूटी-विगलितसाटी-कुलवरपाटीवसुरसपेटीकृतमणिवाटीशुभमुख चेटीचितपुरवाटी-कृतवनकोटीश्वरवरवाटी-पटुपरिपाटी-स्वरचितलोटी-स्तुतधनपालप्रविततमालस्फुटमणिमाल-स्फुरदरिकाल श्रुतनटतालप्रगुणिगुलाल(?)-प्रबलरसाल प्रकुपितकाल भ्रुकुटिजटाल स्फुरत्करवाल त्रुटितकराल-प्रतिभटपालद्विपकटजाल द्विजपति-शुद्धाशयरणविद्धा हितनृपसद्धावनपटुसिद्धाखिलकृतिरुद्धाहितवलसद्धारललितसद्धासवदन युद्धासम-गुणनद्धाखिलजनबुद्धामरतरुविद्धामसुखसमिद्धामलगुणवृद्धाऽविरत-समृद्धाऽश्रितशरविद्धारिकुलपिन-द्धाखिलशुभमुग्धाम[ दनविद ]ग्धामृतरसदिग्धातिविमल-दुग्धामलगुणदग्धाऽसुकृतस्निग्धाभिलषित-जग्धामृतकरलग्धा…………हिमनृपदारापहरणसारानतपरिहारावनिपतिनारायणपरमारायुतनिभ-वाराकरसमतारापति [ मति ] तारापतिविनताराधनपरताराहवदलितारातिसुकविताराम तरुण-धाराधरवरतारावलसुकृतारावहरिकृतारादहित-विहारामृतनिधिपारा-गतगुणभारापगतविकारा-सुहृद-भिचारागमघनसारा-कलित-तुषारावनिभृदुदाराचरितविचारातिविदवताराच्युतमणिहारार्चितकवि-भाराजितबहुभारार्पितवसुधाराऽहसितकुमाराऽऽनमदुपकाराऽसुकृतनिकारायतदुपकारारिकुलकुठारा-मलविदगारानिशमुपचारार्चितशिव कारागृहधृतवाराहिमनृप राम चिरञ्जय राम चिरञ्जय राम चिरञ्जय राम जय ॥

तुङ्गब्रह्माण्डसिंहासनमिदमुदयच्चित्रमध्यास्य नित्यं
न्यञ्चद्दिव्यस्रवन्तीसितचमरचयं लालयन् दिग्वधूभिः ।
राकाचन्द्रातपत्रं दिनकरमुकुटं ग्राहयल्लोकपालान्
निर्जित्यैन्द्रं करीन्द्रं तव जयति यशश्चक्रवर्ती वघेल ॥३॥

जय जय साहिवाराहिमप्रौढचञ्चद्भुजस्तम्भचण्डप्रतापप्रभागालदावानलाटोपनिर्वापणाकेलिपीयूष-धाराधरासारकासारजारण्यलावण्यजिल्लोचनक्षेपलीलालवध्वस्त–विश्वम्भरा-चक्रसीमन्तिनीवर्गचेतो महादर्पदुर्गार्गलस्तम्भसम्भार वित्तेशजम्भारिपौलस्त्यसम्भावनागारपुम्भाव पाथोऽचिरम्भादिसङ्गीत-कुम्भीनसाधीश-गम्भीरिभावासकुम्भीन्द्र-शुण्डाभदोस्सम्पदुज्जृम्भदम्भोधिसंभूतिसम्भाविताम्भ-दम्भोलिदम्भोल्लसद्विक्रमव्याप्तशम्भो परं भूरिजम्भोन्मुखन्यञ्चदम्भोजदृष्टे समारब्धदैनन्दिनानेक-दन्ता-वलालीलसद्दूर्वगन्धर्वसन्दोह-सन्ततसकल्याणसम्भारनानाविधस्वच्छमाणिक्यमालामहाराशि-

मुक्तावलीभारविश्वम्भरामण्डलीदानसंकल्पसम्भूतकीलालकल्लोलिनीकोटिधारामहापूरनिर्वापिताखण्ड भूमण्डलब्रह्मविद्वत्कविस्तोमदुर्वारदारिद्र्यदावानलाडम्बरात्रिभवनकमनीयचूरामणीभूतभूयःप्रतापानल श्रीसुरित्राण-साहालम-प्रौढविश्वम्भरामण्डलाखण्डलानेकचञ्चच्चमू चक्रकादम्बिनीचक्रवालच्छटापायझञ्झामहाचण्डवात्यासमुल्लासदिग्दाहशङ्काकरक्रूरतेजोहुताशारणीभूतभूयो—भुजाविक्रमायोधनद्योतविद्योतमानोदयक्षोणिभृत्तुङ्गश्रृङ्गस्थलीकोणलङ्कापुरीनाथसीमन्तिनीकेलि-संकेतसञ्चारशिञ्जानचञ्चत्पदद्वन्द्वमाणिक्यमञ्जीरझङ्कार-कोलाहल-श्रेणिवाचालकूटत्रिकूटाचलोत्-सङ्ग चाणूरजिच्चण्डचञ्चद्भुजादण्डविक्षिप्तमन्थाचलायस्तपीयूषपाथोधिसम्भूतपद्मालयाचारुबिम्बाधरालोक-सन्दोहसिन्दूरितप्रत्यगाशातटीकूल कन्दर्पकेलीमहाकोपशोणायमानाम्बिकागाढमानापनोदानतस्थाणुकोटीरकल्लोलिनीलोलवीचीच्छटाधौतकैलासपर्यन्तभूगोलजाग्रन्महीपालकोटीप्रणामातिथीभूत भास्वन्महागोपुरप्राङ्गण द्विजकुलकमला(?)टवीसूर कर्पूरसौरभ्यगर्भानन स्वर्धुनीपूरचूडामणिध्यानधाराशतक्षालितप्रौढचञ्चत्कलिज्वालजम्बालसम्भार जम्भारिकुम्भीन्द्रशुण्डाभदोर्दण्डखण्डीकृतामित्र चण्डीपदाम्भोरुहान्तर्द्विरेफायमाणस्फुरच्चित्त चन्द्राननामन्मथ श्रीसुधावारिधे घोरयुद्धावलीचण्डवेतण्डघाटीचमूगण्ड निर्भेदनाकेलिकण्ठीरवाटोपकुण्ठोच्चभावातिभूभृत्सिलेमेन्द्रभूमीन्द्र गन्धर्वकोटीशपूर्णाहुतिद्रव्यलाभाति जाज्वल्यमानप्रचण्डप्रतापानल ब्रह्मकल्याणदृष्टे हृताराति‍रिष्टे महालाभधृष्टे कृतब्रह्मगृष्टेऽरिकल्याणरिष्टे कृतामित्रपिष्टे रसालातिशिष्टे कविप्रौढतुष्टे भजद्वित्तसृष्टे कविद्रोणिदिष्टे नमत्तापकृष्टे भजत्कञ्जनेत्रामनस्कामनापूरसंपूरणाकेलिकौतूहल प्रौढकल्पद्रुमारण्यलावण्यवीचीसमीचीनतातर्जितक्रुद्धमृत्युञ्जयक्रूरभालानलापातकन्दर्पदर्पोदधे जय जय वीरभानुक्ष्मामण्डलाखण्डवंशस्फुरत्क्षीरकल्लोलिनीवल्लभ प्रौढराकासुधासूतिबिम्बप्रलम्बद्विषच्चन्द्रलेखावतंसानिमेषस्रवन्तीतरङ्गप्रपञ्च-प्रफुल्लत्कुमुद्वद्द्युतिद्रोणिसद्यः सुधासूतिकम्बुप्रभावृन्दसंफुल्लकुन्दप्रसूनच्छविस्फीतकीर्तिप्रवाह प्रभो सुन्दरानन्दसिन्धो भुजस्तम्भ मन्थाचलायस्तनिःसीमसंग्राम पाथोधिसम्भूतपद्मालयारब्धलीलापरीरम्भसम्भावनाजृम्भमाणातुलानन्दसन्दोह वीचीभरोदञ्चिरोमाञ्चदण्डाङ्कुरव्यञ्चदुद्दामप्रत्यङ्गसन्नाहसंवीक्षणानन्दितामर्त्यनिर्मुक्तमन्दारमालावलीपूजित श्रीवघेल प्रभो रामचन्द्र प्रसादामृतस्रोतसा सिञ्च पञ्चेषुविद्वेषिकण्ठस्थलीकालकूटानलग्रन्थिदुःखानुजक्षात्कवीनि(?)न्दुबिम्बोदयालोकजम्बालपीयूषकल्लोलिनीनाथकल्लोलगर्भच्छविस्वच्छया रामभूपाल चूडामणे चक्रवर्तिन् दृशा किञ्चिदीक्षस्व नः ॥

स्तम्भौ कृत्वा मरुत्वद्गिरिमलयगिरी लीलयैवोर्ध्वदण्डं
भूरिच्छायत्तचञ्चत्त्वदुरुगुणयुतां पट्टिकामभ्रगङ्गाम् ।
हिन्दोलाकेलिमेषा कलयति भवता राम भूपालमौले
विश्वं प्रह्लादयन्तीमतिमहति जगच्चत्वरे कीर्तिलक्ष्मीः ॥ ४ ॥

रामचन्द्र वघेलपुरन्दर कामकोटिमनोहरविग्रह कामपूरणकल्पमहीरुह यामवत्यधिनाथसमानन चामरानिलचञ्चलकुण्डल धामधूतदिवाकरमण्डल कामपाल विकस्वरकैरवदामदिव्यसरिल्लहरीचयकामजिद्धवलाचलकोमलधामधारयशोभरभासुर भामवत्यभिनव्यमनोभव सामवेदविधिज्ञ पुरोहितवामनस्मृतिपावनमानस वामदेवपदद्वय-पूजक वामदेवसमद्विजमण्डलसमाजवजमण्डित

पण्डितभामहोदयमन्मथ भूमिललाम-नायक सोमशतादभिरामकल्पित शत्रुकदम्बविराम राम-
समाशयशील निकामतर्पितभूसुर सङ्गरडामरक्रमविक्रमसन्त्यज सामशीतल शत्रुभयङ्कर नाममन्त्र-
जितारिभुजङ्ग कृतामराचलकम्पन दान महामहोदय कामकलेवर रामकर्ण-किरीटि-धनुर्द्धर...मरतुल्य
यस्कथरामशत्रुपटुक्रमविक्रमवामनीकृत शत्रुधराधिप सामरार्चनचारुदिनक्रम यामलोदितमन्त्रविदग्रज
भामपारगता(?)भृगुनन्दनचामरादिकराजित सत्कविधाममञ्जिमद्युतिसुरालय मामनोहर सत्कवि-
पण्डितपामरीकृतदुर्जन विद्रुमपल्लवारुणपाणिसरोरुह वल्लभाभाजनपञ्चशिलीमुखफुल्लदम्बुजपत्रविलोचन
मल्लखण्डितचण्डरिपुच्छटहल्लकाकरगन्धभर-प्रतिमल्लसौरभसारकलेवर भिल्लभाग-सुखीभवदप्रियतल्लज
द्विजमण्डलमण्डित मल्लपर्वतवज्र विचित्रतड़िल्लताकरवालसमस्तहरिल्लल्भुजविक्रममर्दलहल्लहरीपण-
वानक-दुन्दुभिवल्लकीरवरागलसच्छमिदुल्लसत्प्रतिपक्षमहाभटशल्लकीवनभञ्जनकुञ्जर चिल्लताविटपिन्
कमलाभुजवल्लरीवृत खण्डसुधाकरजिल्ललाट वघेलकुलक्षितिभृल्ललाम सुरावनकारणवल्लरीसुतपङ्करुहप्रभ-
पल्ललन्तमचिन्तमिलिन्दविपल्लचित्रविचित्रगुणक्षितिरल्लकारुणचारुमणे वरगल्लमञ्जिमतर्जितचन्द्रतुषार-
पर्वतगर्वहरच्छविसारनिधिकीर्तिकदम्बक शारदस्फुरदम्बुजलोचन सारतर्जितमत्तमतङ्गज सारमण्डल-
मञ्जुकलेवर दारचित्तवशीकृतिमन्मथ हारकुण्डलमण्डित-पण्डित शारदासरसीरुहषट्पदवारवाण-
निगूढमहामदवारणप्रकराहवकेसरिसारमन्दिरमञ्जुरुचामरुणारविन्दमनोहर हस्तविचारतर्जितचित्र-
शिखण्डिकुमार कोटिमहामणिवैभव-कारण-द्विजचित्त-मुदामस्रिधारया दलिताहितसैनिकसार
सज्जनचित्तविहङ्गविहारभूरुह सङ्गरसम्पदुदारचित्त सुभाषितकेलिसुधारसैकनिकेतन किन्नरचारणस्तुत-
चारुचरित्र भुजारभव्यभिभूतवृकोदर पारसीकमहीपतिवन्दित नारसिंहयदूत्तमविक्रम भारवि-
प्रतिमल्लकविस्तुतभारवे शरदिन्दुवलाहकपारदद्रवदर्प्यकादम्बनिकारदानमहाविधिनित्यविशारदाभ
यशोमुखरीकृत नारदप्रतिपक्षकदम्बविदारणक्रमचण्ड महीभरधारणक्षमबाहुबल स्फुटतारकापतिमञ्जु-
वरव्यवहार कुङ्कुमपङ्क-मिलद्-घनसारचन्दनचित्रकचर्चित तारकासुरमर्दनविक्रमपारणामृतभीरुदशा-
मुपहार वस्तुसनाथ कराभिभवपारभूपघटाभिरभिद्रुतवारणाधिपदानरसज्ञ महारणाजिरचण्डधनञ्जय
वारधीशगभीरपयोनिधिपारगामियशोभरभासुर भारतीकथनीयभुजाबल भारतोदितयुद्धसमुद्धत
भारतैकविभूषण कृत्युपकारसागरचन्द्र हरेरवतारसम्भव वैरकृताभिचारहोमविपद्दहनप्रतिकारवारिद
कल्पतरोरनुकारतर्जित-दुर्जनचित्त-विकारभाषित-विद्विषदामयसारणानक-चण्डरव-प्रतिवार यौवन-
भूषित सत्कवितारसभृङ्गघटाविकसत्सहकार विक्रमविक्रमसम्पदगार दुर्जनवंशकठोरकुठार मत्तमतङ्गज-
भीषणसम्परायदिवाकरनन्दन चम्पकाभतरुच्छविडम्बरकम्पमान-विरुद्धनृपालिनिलिम्पनाथ-
समामिलिताजितसन्तर्जितवैरिमहीपतिझम्पविक्रम शक्रशताधिक सम्पदर्पणकल्पतरो रणलम्पट-
द्विषदम्बुधिवाडव कल्पसन्निभचित्तभरैरनुकम्पया भृत याचकमण्डलवीरभद्रसुरद्रुमसागरहीरसुन्दर-
दत्तकदम्बक नीरधि-प्रतिमान गभीरधीरताजितशक्रधराधर सीरपाणिसशोभ यशोभरगीरधीश-
दुरापयशस्करवीरचर्चितविश्वजगज्जननीरजायतमञ्जुविलोचन कारतुण्डसमाधरपल्लव धीरयाजित-
शक्रपुरोहितभीरमाकुलवैरिकदम्ब गम्भीरताजितसागर चण्डसमीरवेगतुरङ्गद कल्पसमीरण प्रियविक्रम
चन्द्रपटीरजद्रवलिप्तसुवर्णशरीर शुभ्रकरद्रवचञ्चदुशीरशीतल सप्तपयोनिधितीरविस्तृतसच्चरितालय
वीरसिंहकुलैकधुरन्धर वीरभानुमहीपतिवंशकरीरकोरक राम जय ॥

गर्जद्गम्भीरगन्धद्विरदवनघटाघट्टनाप्रौढझञ्झा-वात्या-कल्लोल-नानाविध-विभवमहादानराधेयमूर्त्ते ।
लीलानिःशेषनिःसारितरिपुरमणीगर्भनिःसारभेरीभूयोभाङ्कार भूमीपतिमुकुटमणे रामचन्द्र प्रसीद ॥५

पृथुतरभुजतटजितकरिकुम्भ द्रुतवरकविकुलनवनिधिकुम्भ
द्विजकुलसरसिजविकसनडिम्भद्युमणिकिरणभरमधुरविजृम्भ
स्फुरदसिविदलितरिपुकुल कुम्भप्रतिभटभटशतजलनिधिकुम्भ-
प्रभव सुकृतहृतकलिमलदम्भ स्फुरदुरुविभवविसर्जितजम्भ
प्रतिभट निजकुशतनुजितरम्भप्रतिनवकृशतनुदृढपरिरम्भ-
प्रमुदित रतिपतिरणरसजृम्भत्तरतनुपुलकमुकुलनिकुरम्ब
प्रतिलसदधरविजितवरबिम्ब स्फुरदुरुतनुरुचि-जित-रविबिम्ब
क्षितिपति-सुरपति-जगदवलम्बस्फुटभुजबलजितसुरपतिदम्भ
द्विजपति-पशुपति-कुटजयलम्ब-प्रमथन-सुरसरिदमृतविरम्ब
प्रद्गुण सुरकरि-करसमलम्ब-प्रबलसुभगभुजलसदसिकृत्त

प्रतिभटविकट..................मदमत्तद्विरद-विकटकटकरटनिकृत्त द्विजकुल-विपदवनतबहुवित्तप्रद निजतनुरुचिभरजितचित्तप्रभव विभवभरसुजनविपत्तस्कर-वर भरतगदितबहुनृत्तक्रमबुध विमलकनकरुचिदामव्यतिकरकचचितवपुरभिराम प्रधनविकटगतिविहसितराम स्फुटनिजगुणधवलिमजितराम प्रतिकलहृदयनिहितरघुराम क्षितिधर जय जय जय नृप राम ।

माद्यद्वैतण्डगण्डच्युतमदलहरीसञ्चरच्चञ्चरीकी—
झङ्कारानन्दगीताः कविभवनभुवस्ताः पुरस्ताद्भवन्ति ।
पश्चादञ्चन्ति तेषामुपरि करुणया राम-भूपालमौले-
रुद्वेल्लद्दुग्धवीची-बहलधवलिमाबद्धकक्षाः कटाक्षाः ॥६॥

वीरारुणप्रभव हीराभिरामरद धीरारविन्दतरणे नृपमुकुटमणिकिरणधवलपदसरसिरुह मन्दाकिनीलहरीवृन्दावदात विधुकुन्दाभिराम सुमते भुजगपतिसुभगविजितरिपुनृपतिकुल कल्पावनीरुहविकल्पायमानभुज कल्पानलस्फुरदसे शरदमृतकरविकचकुमुदवनविशदगुण कञ्जाटवीकिरण-पुञ्जापहारविधिसञ्जातगर्वनय नाकुसुमशर-शरदलित पिशुनबलविकटभटशर्वाचलप्रचुरगर्वापहारपटु-सर्वानुरञ्जनकृते कविकमलतरुणतरणि-करचरणतलदम्भोलिपाणिसम सम्भोग-पञ्चशर रम्भोपमानयुवते हरमुकुटतटघटितविधुशकलपटुनिटिल दन्ताघलप्रद समन्तादपारबलसन्तापितारिनृपते कनकगिरिशिखरनिभतनुकिरणभृतभुवन निःसामचण्डरवनिःसारितारिकुल दुःसाधसाधनपटो-मदकलितनवयुवतिमतिमथनरतिरमण चिल्लीविलासहतडिल्लीपतिप्रभृतिहल्लीसहासजलधे बलमथन-मणिविलसदलिकलभकचनिचय फुल्लारविन्दमुख मल्लाहतारिकुलमल्लातिमोहनतनो हरिकरटि-करचलितसुरसरिदमलचपलवीचीकदम्बक समीचीनशीलचय नीचीकृतामरपते प्रबलभुजपरिघबल-विजितसुरकरटिकर जम्भारिवित्तपरिसम्भावनाभवनपुम्भावरत्नजलधे विमलतरचरितचयपरि-

हसितहरवृषभ कासारजप्रचयहासातिलोलमुखदासायितद्विजपते सुरविटपितटविलसदरुणकरचरणतल तालातिलम्बकरबालामनोजकृतहालाहलाशतनते दिवस-करजनुरनुजशतसदृश-मुखभणित-पञ्चायुध-प्रतिम सञ्चारविष्णुरथ पञ्चाननप्रतिकृते विबुधसरिदमलतरतुहिनगिरिगुरुचरित दर्वीकरेन्द्रभुजखर्वी-कृतार्थिविपदुरगाश-मस्तकमणे सुरविटपितलविलसदमरगणगणितगुण यक्षाधिनाथसमरक्षारघुप्रवर-कक्षानमत्सुरतरो कनकगिरिविपुलतरदृषदुपमहृदयतटरक्षोरिपुप्रतिम वक्षोविशाल समर-क्षोभितारिनृपते धरणितलधरणविधिभुजगपतिभविकभुज राकासुधाकिरणपाकाहितद्विरदनाकार-कीर्तिलहरे चतुरुदधिलसदवधिभुवनतलमथनशङ्कायुतस्वनदलङ्कारहीरमणिझङ्कारित द्रुतकवे भजदुदयदभिलषितफलविबुधतरुविपिन ॥

मुक्तालङ्कारवत्यः कुवलयनयनाः कुम्भिनः कुम्भकूट-
श्च्यद्दानप्रवाहाः पवनजवजितो दिव्यकाम्बोजवाहाः ।
प्रासादाश्चन्द्रशाला विलिखितवियतो भूयसी भूतधात्री
सूते किं किन्न सद्यः फलमभिलषितं रामदृक्कामधेनुः ॥ ७ ॥

जय क्ष्मापुरन्दर प्रफुल्लनन्दनाटवीविचित्रकल्पभूरुहच्छटातलस्थलस्फुरत्सुपर्वपर्वतस्तनी-कदम्बडम्बरकणद्विचित्ररत्नवल्लकीकलप्रलापलालित प्रणीतगीतकौतुक-प्रगीत चण्डबाहुदण्डमण्डलाग्र-खण्डितारिमण्डलीमदप्रमत्तकुञ्जरप्रपञ्चकण्ठगह्वरप्रवृत्तरक्तनिर्झरीकदम्बकोभयप्रतीरतुङ्गरङ्गचत्वरप्रवृत्त-भूतभाविनीभयङ्कराभ विभ्रमद्भुजाभिभूतभूतलप्रचण्डविक्रमानलज्वलद्दृशास्यदुर्धरस्फुरद्भुजद्रुम कठोरवातघूर्णनाविलोल राजताचलस्खलन्मनोजमर्दनस्फुरज्जटाकदम्बकाक्षरन्निलिम्पनिर्झरीविलोल-वीचिवल्लरीविधौतकण्ठकन्दला विचित्रभूषणीभवद्भुजङ्गनायकप्रभालसद्यशःश्रेणीसिन्धो रामभूपते जय प्रचण्डबाहुदण्डमन्दरक्ष्माधरेन्द्रमथ्यमानयुद्धभूमिदुग्धसिन्धुसार्वभौम सम्भवच्छरोरुहासहस्र-पूरपूर्यमाणयावदर्थिसार्थ खञ्जरीटलोचनाकदम्बहारहारहीरहेमरत्नकङ्कणच्छटादिभूषणावलीझणझण-झणकृतिप्रगीयमानकीर्तिजाल कालरात्रिकल्पचन्द्रहासवल्लरीनिकृत्तवैरिवीरकण्ठपीठ सन्धिबन्धनिः-सरत्प्रभूतरक्तनिर्झरानवद्यहृद्यमद्यपानमोदमानयातुधानगीयमानतुङ्गमानदोष्प्रमाण वीरसिंहभूमि-पालचक्रवंशदुग्धसिन्धुनाथपर्वशर्वरीकलत्रबिम्ब वीरभानुमेदिनीन्द्रचक्रवालमौलिरत्नगोत्रपुण्डरीक-मण्डलैकबालचण्डभानुमण्डल स्फुरत्पुरन्दरद्विपप्रचण्डहस्तगर्भजिद्भुजस्तम्भ श्रीमद्रामभूपते । कचाकचिप्रपञ्चितप्रवृद्धमेदिनीतलप्रचण्डबाहुजन्मबाहुदण्डमण्डलाग्रचण्डकेलिकल्पनाकुतूहल प्रपञ्च-कृत्तचक्रवालकल्पभैरवप्रभञ्जन-प्रतीपभूपभामिनीमुखारविन्द-सुन्दरस्मित-प्रतानचन्द्रिकाकदम्बराहु-मण्डल प्रकोपकर्बुरस्फुरत्कृतान्तचिल्लिवल्लरीसमुल्लसत्कृपाणिकापटुप्रदा.................सुन्दरी निवासचन्दनाचलायमानचारु-मीनसल्लसद्भुजार्गला-विराजमानदान - मानमोदमानमानसानमत्-समस्त-साधु-सञ्चय क्षयज्वलद्धनञ्जय-प्रभाकदम्बकावलीढशातकुम्भ-शैलशृङ्गशौटीरोद्यचाकचक्यचारु-देहदीप्तिदामवल्लरीसुधातरङ्गधोरणीनिषक्तमन्मथानलप्रतप्त-बालकामिनीनिकाय-दुःसहार्तिहृय-मान-हृद्विद्वद्बन्धो(?)रामभूपते ॥विलुण्ठितेवराहिमप्रवण्डसाहिवल्लभाकचप्रपञ्चमल्लिकासदर्चिताङ्घ्रिपल्लव स्फुरन्मनोजसम्भ्रमस्खलद्दुकूलबालनागरीविलोचनाम्बुजाञ्जलिच्छटानिपीयमान सुन्दरस्फुरन्मु-खेन्दुचन्द्रिकामहाकदम्बडम्बर-प्रतिक्षण-प्रवर्द्धित-त्रिविक्रमाङ्घ्रिपल्लवे क्षरन्निलिम्पनिर्झरीतरङ्ग-

धौतरोहिणीभुजङ्गमण्डलप्रभामहत्त्वगर्वजित्वर स्फुरद्यशोविलासवासकच्युते कवित्वतत्त्वविद्धधूसकीहिहैकसागमप्रवीणदृष्टिक्कणितस्फुरन्मदस्खलन्मनस्विनीमनोजमोहमोचन-प्रभाकर प्रभाभरप्रफुल्ल-कञ्जलोचन प्रतीपकर्ममेदिनीभुजङ्ग दर्पसागरप्रचण्डवाडवानलच्छटायमान दुर्धरप्रतापसञ्चय प्रसीद वीरभानुसत्कुलैकवासव क्ष्मापते रामभूपते ॥

साधूनुच्चैः सृजन्तः प्रणतमनुदिनं सम्भ्रमात् पालयन्तः
कुर्वन्तो भस्मसाच्च प्रतिनृपतिचमूमण्डलं लीलयैव ।
शोणश्यामावदाताः शुभचरितशरच्चन्द्रपौरस्त्यशैल
श्रीराम त्वत्कटाक्षाः कमलजवलिजिच्छम्भुलीलां भजन्ते ॥८॥

अतिसुन्दरगुणमन्दिरमिन्दुमुखीमदनम्—
मदनारिजटाविधुचारुगुणं गुणिव्रातकचक्रनवीनघनम् ।
घनसारपटीरजलिप्ततनुं तनुमध्यनिबद्धलसन्नखरम् ॥९॥
खरदीधितिमण्डलचण्डरुचिं रुचिवीचितृणीकृतपञ्चशरम् ।
शरणागतशत्रुनृपालकुलं कुलशैलसमुन्नटसद्द्विरदम् ॥१०॥
रदनाकृतिनिर्जितहीररुचिं रुचिभूतदिवाकरबिम्बशतम् ।
शतकोटिकरप्रतिमानबलं बलभद्रसशोभयशोनिकरम् ॥११॥
करदातृदरिद्रितदुर्गनृपं नृपकोटिविसङ्कटहस्तिनखम् ।
नखरस्फुरदद्भुतमध्यभुवं भुवनप्रथितप्रचुरप्रकृतिम् ॥१२॥
कृतिमण्डलमण्डनमञ्जुमतिं मतिमच्चयवन्दितचारुगुणम् ।
गुणशीलवदग्रसरप्रसरं सरसीरुहमञ्जिमजिच्चरणम् ॥१३॥
रणमण्डलचण्डसमीरसुतं सुतरामनवद्यचरित्रधरम् ।
धरवल्लभधीरमुदारमतिं मतिमच्चय-सञ्चय-पञ्चमुखम् ॥१४॥
मुखचन्द्रविनिर्जिततामरसं रसराशिसमुज्ज्वलकीर्तिभरम् ।
भरणादिसुखीकृतभूमितलं तलघातनिपातितमत्तगजम् ॥१५॥
गजदानविधानसुपर्वतरुं तरुणीजनकैरवशीतकरम् ।
करवालविदारितवैरिबलं बलसूदनकोटिमहाविभवम् ॥१६॥
भवपादसरोरुहषट्चरणं रणदद्भुतभूषणतुष्टकविम् ।
कविताकुसुमप्रकरभ्रमरं मरहट्टमहीपतिदत्तकरम् ॥१७॥
करहाटकभूपतिनित्यनतं न तमोधिकलङ्कितचित्तगतिम् ।
गतिमञ्जिमतर्जितमत्तगजं गजनायकहस्तविशालभुजम् ॥१८॥
भुजगाधिपजित्वरभीमबलं बलभद्रसहोदरभक्तिनिधिम् ।
निधिनाथसहस्रसमानधनं धनसारसमर्पणदर्पजनम् ॥१९॥
जनगीतविशालभुजायुगलं गलमञ्जिमनिर्जितकम्बुरुचिम् ।
रुचिराकृतितर्जितसोमबलं बलिकर्णयुधिष्ठिरनिष्ठमहम् ॥२०॥

महनीयमहोन्नतशीलभुवं भुवनस्तुतिभाजनदानविधिम् ।
विधिवज्जपतोषितचक्रधरं धरणीतलजङ्गमकल्पतरुम् ॥२१॥
तरुणद्युमणिप्रसरन्महसं हसदम्बुजसन्निभमञ्जुमुखम् ।
मुखरीकृतदिग्जयवाद्यघटं घटमानविरुद्धतमिश्रविधुम् ॥२२॥
विधुरीभवदर्थिमयूरघनं घनपुण्यनिधानगभीरहृदम् ।
हृदयातिथिकैटभवैरिकृतं कृतसंस्मरणप्रवसच्चरितम् ॥२३॥
ऋततायनपाण्डुकुमारवरं वरणं सुकृतः शतकोटिसमम् ।
समरागतराजचमूविकटं कटकान्तमितक्षितिचक्रभरम् ॥२४॥
भरणादिसुखीकृतभूरिनृपं नृपनागरिकाशरणैकभुवम् ।
भुवनत्रितयैकमहाचतुरं तुरगद्विपदानधनव्यसनम् ॥२५॥
सनकादिसमानमुकुन्दरतिं रतिनाथसहस्रमदाशुसुमम् ।
सुमनःकमलाकरसत्सहृयं हयनायकदर्शितसद्विनयम् ॥२६॥
नयनन्दितविश्वजगद्धृदयं दयया परिपालितदीनजनम् ।
जननीतिजगज्जनताविदितं विदितारिपदस्मरणप्रवणम् ॥२७॥
वनकुञ्जगतारिनृपप्रसरं शरदच्छवघेलकुलाभरणम् ।
रणखण्डितचण्डविपक्षप्रभुं प्रभुरामवघेलमहं कलये ॥२८॥
हे गौरि ब्रूहि रम्भे कनकमयनदीमेहि लीलावगाह-
ब्रह्मानन्दाय मुग्धे कनकमयनदी कुत्र केयं प्रयाति ।
वीर-श्रीवीरभानुक्षितितिलककुलस्तम्भचण्डप्रताप-
ज्वालाकल्लोलतापद्रुतकनकगिरिस्यन्दधाराप्रवाहः ॥२९॥
एणाक्षीवक्रचेतःसरसिजतरणे शारदाकान्तनाली-
वैत्र श्रीकण्ठचन्द्रावलिगलितरसश्रेणिसच्छायकीर्ते ।
त्यागक्रीडारसाल क्षितितलतिलक क्षत्रकल्याणराशे
दारिद्र्यारण्यकालानल किरणनिधे रामचन्द्रेन्द्र जीयाः ॥३०॥

जय जय चण्डिकानाथलालाटरङ्गस्थलीचण्डचित्रार्चिरछातकीलच्छटविलसदसिदण्डखण्डीकृतोदारतारातिक्षिकीलालधाराशतक्षालिताशातट शिशिरकरकरकिरीटकर्णावलानद्धशेषाहिजाटपटपारङ्गशृङ्गारगङ्गाजल त्रिदशनगरजातिचञ्चद्यशःश्रेणिसंछादिताशेषधात्रीचन्द्र स्थिरानायक ॥

इत्यकब्बरीकालिदासकविश्रीगोविन्दभट्टविरचितः श्रीमहाराजाधिराजरामचन्द्रयशः-प्रबन्धः समाप्तः ॥

## DESCRIPTION OF MS.

Ms. No. 8269 of the Royal Asiatic Society of Bengal—3109 of MM. Haraprasad Shastri's Catalogue, Vol. IV, p. 85.

The MS. is written on country—made paper in Devanagar script. Size 10 × 3 inches. Folios 18 ; 6 lines to a page.

There are many slips here and there and the writing is at times careless. I am noting below some of the important amendations. If I could avail myself of the only other MS. of the work hitherto known, viz. the one preserved in the library of the Maharaja of Bikaner (Ms. 522, Mitra's Catalogue, p. 247), much labour could have been saved.

### *LIST OF AMENDATION*

| MS.Readings | Amendations | Page | Line | MS.Readings | Amendations | Page | Line |
|---|---|---|---|---|---|---|---|
| न्यंकुर्वनूतं | न्यक्कुर्वन्तं | १ | ३ | विमतारा | विनतारा | २ | १७ |
| स्मेरो | स्मेरे | १ | ९ | राह्नमदुप | राऽऽनमदुप | २ | २० |
| कवगुण | कचगुण | १ | १२ | कुलकण्ठराम | कुलकुठाराम | २ | २१ |
| तरुद्गतडिल्ली | तरुवृतभिल्ली | १ | १३ | -च्चित्तम- | च्चित्रम- | २ | २३ |
| करिपुंनृभा | करिपुरम्भा | १ | १५ | मुकुरं | मुकुटं | २ | २५ |
| भवनशुम्भा | भव शुम्भा | १ | १५ | जयीत | जयति | २ | २६ |
| समस्तम्भा | समशुम्भा | १ | १६ | वाघेल | वघेल | २ | २६ |
| सुकृतस्पन्दन | सुवृतस्यन्दन | १ | १९ | पुम्ताव | पुम्भाव | २ | २९ |
| रणभुविक्रृत | रणभुविकृत्त | १ | २० | -च्चमूंचक्र | च्चमूचक्र | ३ | ३ |
| किटिरतत्तद्धनि | किटिरत्तद्धनि | १ | २१ | मयौवनद्योत | मायोधनद्योत | ३ | ५ |
| नृत्तब्रूम | नृत्तक्रम | १ | २१ | सिञ्जान | शिञ्जान | ३ | ५ |
| विनियक | वनिपक | १ | २२ | धरोलोक | धरालोक | ३ | ७ |
| कलिङ्गाधिपते | कलिङ्गाधिपति | १ | २२ | द्विवकुल | द्विजकुल | ३ | १० |
| लङ्काधिक | लङ्काधिप | १ | २३ | सौरत्यग | सौरभ्यग | ३ | १० |
| ङ्काटस्घुणा | ङ्काट[घु]स्घुणा | १ | २५ | क्षातिल | क्षालित | ३ | १० |
| सुकृस्फूर्त्तं | सुकृतस्फूर्त्तं | १ | २६ | कुण्ठीच्च | कुण्ठोच्च | ३ | १३ |
| निरुपमशीला | निरुपमशीला | २ | १ | विष्टे | रिष्टे | ३ | १४ |
| मूलालन | मूलानल | २ | ७ | पिष्ठे | पिष्टे | ३ | १५ |
| स्मरचित | स्वरचित | २ | ११ | प्रौड | प्रौढ | ३ | १५ |
| दनसम | सवदन | २ | १४ | भजत्कं ज | भजत्कञ्ज | ३ | १५ |
| म······ग्धा | म[दनविद]ग्धा | २ | १५ | कुमुद्वद्यति | कुमुद्वद्द्युति | ३ | १८ |
| स्ग्धा···हिमनृ | स्ग्धा॥।ऽऽहिम[त?] | २ | १६ | प्रमोद्ध | प्रभोद्ध | ३ | १९ |
| पति···तारा | पति[मति]तारा | २ | १७ | निमूषीम | निःसीम | ३ | २० |

| MS. Readings | Amendation | Page | Line | MS. Readings | Amendation | Page | Line |
|---|---|---|---|---|---|---|---|
| भूरोदंचि | भरोदञ्चि | ३ | २१ | करलम्ब | करसमलम्ब | ५ | १२ |
| स्रुघदु | स्रव्यदु | ३ | २१ | दसिहृत्त | दसिकृत्त | ५ | १२ |
| श्रीवबेल | श्रीवघेल | ३ | २२ | गीतास्कवि | गीताः कवि | ५ | १९ |
| यथञ्चत्वदु | यत्तवञ्चस्त्वदु | ३ | २६ | हरिवृन्दा | हरीवृन्दा | ५ | २२ |
| सामज | समाज | ३ | ३२ | वयनीचि | चयनीची | ५ | ३० |
| सन्तज | सन्त्यज | ४ | २ | जरुरनुज | जनुरनुज | ६ | २ |
| रुहषद्यद | रुहषट्पद | ४ | १३ | दुवाशम | दुराशम | ६ | ३ |
| हाः वस्तु | हारवस्तु | ४ | २० | यां वदर्थि | यावदर्थि | ६ | १९ |
| कराभिव | कराभिभव | ४ | २१ | कवाकचि | कवाकचि | ६ | २४ |
| रभिद्युत | रभिद्रुत | ४ | २१ | कस्यना | कल्पना | ६ | २४ |
| रुकार | रनुकार | ४ | २४ | तांह्रिपल्लव | ताङ्घ्रिपल्लव | ६ | ३० |
| यौवनमूयितमत् | यौवनभूषितसत् | ४ | २४ | स्खलदुहाल | स्खलद्विशाल | ६ | ३१ |
| पालनि | पालिनि | ४ | २६ | शौण | शोण | ७ | ७ |
| मितलता | मिलिता | ४ | २६ | कटाक्षा | कटाक्षाः | ७ | ८ |
| स्कथवि | स्करवी | ४ | २९ | खदीधिति | स्वदीधिति | ७ | १२ |
| वैरीकदम्ब | वैरिकदम्ब | ४ | ३० | सर्प्यण | सर्पण | ७ | ३१ |
| विस्तत | विस्तृत | ४ | ३२ | गभीरहृदम् | गभीरहृदम् | ८ | ७ |
| गर्जदुपंधि | गर्जदुगम्भीर | ५ | १ | शुमम् | सुमम् | ८ | १३ |
| कुल | कुम्भ | ५ | ५ | नयन | नयम् | ८ | १४ |
| रतियति | रतिपति | ५ | ८ | नयनंधित | नयनान्दित | ८ | १५ |
| तनुरुवि | तनुरुचि | ५ | ९ | छेल | घेल | ८ | १७ |
| वज | दम्भ | ५ | १० | प्रभुं | विभुं | ८ | १८ |
| कुटजप्रलम्ब | कुटजयलम्ब | ५ | ११ | काञ्चभूषाः | काचभूषाः | ८ | ३६ |
| विडम्ब | विरम्ब | ५ | ११ | | | | |

**POST COLOPHON :**

इदं पुस्तकलिखा तं नन्दनेन ॥ शुभमस्तु ।

क्षीरोदीयन्ति सद्यः सकलजलधयो वासुकीयन्ति नागाः
कैलासीयन्ति शैला दिवि च दिविषदः शङ्करीयन्ति सर्वे ।
यौष्माकीणे समन्तात् प्रसरति भुवने चारुकीर्तिप्रताने
मद्योषाकाचभूषाः किमिति न सहसा मौक्तिकीयन्ति देव ।३१।

# अकवरीकालिदासगोविन्दभट्टविरचितरामचन्द्रयशः-प्रबन्धस्याकारादिमातृकावर्णानुक्रमेण श्लोकसूची ।


| श्लोकः | श्लोकाङ्कः |
|---|---|
| **ऋ** | |
| ऋततायन० | २४ |
| **ए** | |
| एणाक्षीचक्र० | ३० |
| **क** | |
| करदातृदरि० | १२ |
| करहाटकभू० | १८ |
| कृतिमण्डलमण्ड० | १३ |
| क्षीरोदीयन्ति | ३१ |
| **ख** | |
| खरदीधितिम० | १० |
| **ग** | |
| गजदानविधान० | १६ |
| गजेंद्रगम्भीर० | ५ |
| **ज** | |
| जनगीतविशाल० | २० |
| **त** | |
| तरुणद्युमणि० | २२ |
| तुङ्गब्रह्माण्ड० | ३ |
| **म** | |
| नयनन्दित० | २७ |
| **भ** | |
| भरणादिष्ठ० | २५ |
| भवपादस० | १७ |
| भुजगाधिप० | १९ |
| **म** | |
| मदनारिजटा० | ९ |
| महनीयमहो० | २१ |
| मुक्तालङ्कारवत्यः | ७ |
| मुखचन्द्रविनि० | १५ |
| **र** | |
| रणमण्डलचण्ड० | १४ |
| रदनाकृतिनि० | ११ |
| **व** | |
| वनकुञ्जगतारि० | २८ |
| विधुरीभवद० | २३ |
| सनकादिस० | २६ |
| साधूनुच्चैः सु० | ८ |
| स्तम्भौ कृत्वा | ४ |
| स्मेरे चन्द्रा० | २ |
| **ह** | |
| हे गौरि ब्रूहि | १ |
| हेम-ग्राम० | |


*Verses of the Rāmacandra-yaśaḥ-prabandha ...ed elsewhere*

| P. | V. | |
|---|---|---|
| 2 | 3 | Quoted in Padyaracanā, 14; Sūkti-sundara, 63; Subhāṣita-ratna-bhāṇḍāgāra 138. 89. |
| 6 | 7 | Padyaveṇī 105 |
| 8 | 29 | Padyaveṇī 65 |
| 5 | 6 | Padyaveṇī 104; Subhāṣita-sudhā-ratna-bhāṇḍāgāra, 423. 53 |
| 7 | 8 | Padyaveṇī 106 |